National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 324-327
© 2025 NJHSR
www.sanskritarticle.com

**कोगण्टि रामानुजाचार्यः**
शास्त्रपण्डितः,
श्रीवेङ्कटेश्वरवेदविज्ञानपीठम्,
ति ति दे, तिरुमला

**Correspondence:**
**कोगण्टि रामानुजाचार्यः**
शास्त्रपण्डितः,
श्रीवेङ्कटेश्वरवेदविज्ञानपीठम्,
ति ति दे, तिरुमला

# अनर्घराघवनाटके मुरारेः निखिलशास्त्रवैदुष्यम्- व्याकरणशास्त्राभिनिवेशश्च

**कोगण्टि रामानुजाचार्यः**

संस्कृतसाहित्यप्रपञ्चे बहुषु शास्त्रेषु निष्णातः कविः मुरारिः एकेनैव अनर्घराघवनाटकेन बहुकाव्यकर्तृणां कीर्तिमवाप। सामान्यतया कवयः काव्येषु सरलानां सरसानां वाक्यानां, अलङ्काराणां, प्रसिद्धविषायाणाञ्च प्रतिपादनेन काव्यशोभां संवर्धयन्ति, एवं काव्योपमानेषु वैदिक-शास्त्रीय-सम्प्रदायविषयान् विरलतया प्रदर्शयन्ति। परन्तु अनर्घराघवकर्ता मुरारिः स्वीयकाव्ये साधारणोपमानेष्वपि श्रौतस्मार्तादि वैदिकसम्प्रदायेन साकं अनेकशास्त्रपाण्डित्यमपि प्रस्फुटं प्रादर्शयत् । केषाञ्चन शास्त्रसम्प्रदायानां सरणिं अस्मिन् काव्ये चमत्कारपूर्वकं श्लोकेषु, गद्येषु च आविश्चकार। यथा -

१) **आपस्तम्बश्रौतम्** - ' पश्यैते पशुबन्धवेदि ..'[1] इत्यस्मिन् श्लोके आर्षधर्माचरणं वर्णयन् आपस्तम्बसूत्र-विधानं समसूचयत् ।

२) **वेदान्तदर्शनम्**- एवं बहुत्र 'ब्रह्मज्योतिर्विवर्तम्...'[2] इत्यादिपदप्रयोगेण वेदान्ते विवर्तवादे अस्य रुचिः ज्ञायते। एवं 'शृङ्गाराद्वैतवादी'[3] इत्येवं चन्द्रमुद्दिश्योक्तौ अद्वैतवादसंस्कारः स्पष्टी भवति। एवं 'अविद्याबीजविध्वंसात्...'[4] इत्यस्मिन् श्लोके अविद्याबीजरूपस्य पापस्य नाशेन विश्वामित्रः स्वीयेन आर्षचक्षुषा भूतभविष्यत्कालमपि वर्तमानकालमिव वेत्तीति, ब्रह्मज्ञानसम्पन्नत्वात् लौकिककर्मकलापैः सम्बन्धाभावेऽपि केवलं क्रीडारूपेण सः यागादिकं निर्वर्तयति इति, 'प्रज्ञातब्रह्मतत्त्वोऽपि...'[5] इत्येवं श्लोके उक्तरीत्या यद्यपि ब्रह्मज्ञानिनः कर्माचरणमनावश्यकं तथापि **यावद्देहपातं कर्म समाचरेदि**ति आर्षसम्प्रदायानुसारं कर्माचरणमपरिहार्यमिति कविना सूचितम्। एवं सृष्टिवर्णनावसरे 'एकत्र तमसा, अपरत्र तेजसा च आवृतेयं ब्रह्माण्डसृष्टिः अनिर्वचनीयम्'[6] इत्येवं कथयता कविना अनिर्वचनीयवादः समस्पर्शि। एवमेव 'मुनीन् कौशिकवैदेहान्...'[7] इति श्लोके 'ज्ञानेन मोक्षः, कर्मफलेन स्वर्गः प्राप्यते' इति वेदान्तदर्शनरहस्यम् उपमामुखेन आविश्चकार ।

३) **वेदपरिज्ञानम्** - ' यजूंषि तैत्तिरीयाणि '[8] इति श्लोके यजुर्वेदीयतैत्तिरीयशाखाविर्भावं प्रादर्शयत्। साधारणोपमानेष्वपि वैदिकसम्प्रदायानामाविष्करणे कवेरस्य प्रीतिरधिका। मुरारिणा बहुत्र अथर्ववेदप्रस्तावना कृतेत्यतः तस्मिन् काले समाजे अथर्ववेदस्य प्राचुर्यं, मुरारेः अथर्ववेदपरिज्ञानञ्च स्पष्टीभवति ।

एवं '**पार्श्वे त्रयीणाम्**..'[9] इति श्लोके जनकशतानन्दविश्वामित्राणां सन्निधौ विद्यमानौ रामलक्ष्मणौ वर्णयन् ऋग्यजुस्साम्नां सविधे विद्यमानस्य अथर्ववेदस्य विधिमन्त्राविव राजेते इति प्रावर्णयत् । अत्र रामः अथर्ववेदविधिरूपः इत्यनेन शान्तस्वरूप इति, लक्ष्मणः मन्त्ररूपः इति कथनेन मूर्तीभूतोग्रस्वरूपः इति वैदिकपरिभाषया कविः प्रत्यपादयत्। एवं विश्वामित्रः जनकं प्रशंसन् '**अद्य प्रदक्षिणशिखावलयः कृशानुः**[10]' इति श्लोके ' अद्य प्रदक्षिणज्वालावेष्टितः अग्निः अस्माकं जनपदेषु हुतं द्रव्यं स्वीकरोति ।

भवतां तेजसि स्फुरति सति अङ्गिगरोरूपः शतानन्दः शान्तिपौष्टिकक्रियासु हवनार्थं गृहीताज्यां सृचं शिथिलीकरोति' इत्येवं कथनावसरे अथर्ववेदप्रसिद्धयोः शान्तिपौष्टिकक्रिययोः प्रस्तावना कृता। अनेन कवेरस्य वैदिक परिज्ञानं नितान्तं वरीवर्ति इति ज्ञायते।

**४) न्यायशास्त्रम्** - मुरारिः न्यायशास्त्रसम्प्रदायान् अलङ्कारशास्त्रसम्प्रदायानपि परामृशति। यथा पञ्चमाङ्के रावणवचनेषु **'वैशेषिककटन्दीपण्डितः जगद्विजयमानः पर्यटामि, क्वासौ रामः तेन सह विवदिष्ये'** इत्यारभ्य **'भोः भोः वाचोयुक्तिज्ञ सर्वेषां विद्रावणः खल्वहम्' इति रामस्य व्याहृतमन्यथाभिसन्धाय वाक्छलेन प्रत्यवतिष्ठमानः निगृहीतोऽसि'**[11] इत्यादि वाक्येषु न्यायदर्शनप्रतिपादितवादप्रक्रियाः, छलनिग्रहस्थानादींश्च समस्पृशत् ।

**५) रसवादः:** - मुरारेः रचनाशैल्यानुसारम् अयं रसवादेषु अनुकार्यनिष्ठमिति रसवादमाश्रितः इति ज्ञायते। **मयि रसतया शोको भावः चिरेण विपच्यते...**[12] इति श्लोके रामे अविरलश्वास-मुखशोष-स्वरभेद-अवयवता-विवर्णतादि अनुभावसात्त्विकभावान्, जाड्यादि सञ्चारिभावान् च दर्शयित्वा एतन्मूलकतया शोकभावः करुणरसतया विपरिणमते इत्येवं कथनेन रसः अनुकार्यनिष्ठः इति स्पष्टीक्रियते। एवमेव नाटकेऽस्मिन् एतत्पूर्वं **पुण्यलक्ष्मीकयोः...**[13]" इति श्लोके रामादिषु विद्यमानवीररसस्य तेषां मौञ्जीबन्धनादिव्यक्तशान्तर-सोऽपि उपकारको जातः इति वचनेन वीरशान्तरसावुभावपि रामलक्ष्मणयोः आविर्भूतावित्येवं निरुक्तानुकार्यनिष्ठरसवादमेव समर्थयति। अत एव इष्टार्थकल्पवल्लीव्याख्याने श्रीरामानन्दा-श्रममुनिरपि **अथवा मुख्यया वृत्त्या रामादावनुकार्ये, तद्रूपतानु-सन्धानान्नर्तकेऽपि वीररसः प्रतीयत इति भट्टलोल्लटादिमत-मनुसृत्योक्तम्। इदमेव कविरुत्तरत्र वक्ष्यति, मयि रसतया इति**[14] इत्येवं व्याचष्टे ।

एवमेव यः कश्चनानुभूतः रसः रसान्तरेण तिरोधानकरणमिति आनन्दवर्धनादिग्रन्थेषु सिद्धो विषयः । एनं कविः नाटकेऽस्मिन् पञ्चमाङ्के- **केन पुनरेष रसो रसान्तरेण तिरस्क्रियते**[15] इति वचनेन करुणरसः रौद्ररसेन तिरस्क्रियते इति कबन्धवृत्तान्तप्रस्तावनया समसूचयत्। **रौद्रवीरभयैः शान्त्या करुणस्तु प्रशाम्यति** इति शास्त्रकारवचनमत्र प्रमाणम्। एवं सप्तमाङ्के **-प्राणायामोपदेष्टा ...**[16] इत्यादि श्लोके शृङ्गाराद्वैतवादी इति पदेन शृङ्गारः एक एव रसः इति रसवादः अभिव्यज्यते। एवं यथासन्दर्भ कैशिकी, आरभटी इत्यादि शब्दानपि प्रायुङ्क्त। अपि च सप्तमाङ्के - **बिभ्रतीं कैशिकीं**[17] इति नाटके श्लोके कैशिकीवृत्त्या युक्तां वैदर्भीरीतिं महाराष्ट्रकवयः आश्रयन्ते इत्यपि प्रत्यपादयत् ।

**६) राजनीतिपरिज्ञानम्** - एवमेव काव्येऽस्मिन् बहुत्र मुरारिणा राजनीतिपरिज्ञानमपि प्रादर्शि। यथा -

१.अहिभयोपजापजर्जरं सुहृद्गृहमुपश्रृत्य....आत्मबलैकदेशं वालिप्र-तिग्रहाय प्राहिणोत्।[18]

२.आरण्योऽग्निरिव सुखदुःखामर्षजं तेजो विक्रमयति, मण्डलस्य चानुग्राह्यो भवति।[19]

३.राजपुत्रोऽङ्गदोऽसौ बालोऽनवबुद्धिरामपात्रमिव यद्यदाधीयते तत्तत् आचूषति।[20]

४.अरिषड्डुर्ग एवायमस्यास्तातपदानि षट्तेषामेकमपि छिन्दन् खञ्जयभ्रमरीश्रियम्[21]।

....इत्यादि वाक्यानि मुरारेः राजनीतिनिपुणतां द्योतयन्ति।

७. **मुरारेः व्याकरणशास्त्राभिनिवेशः - पदप्रयोगवैचित्र्यम्**

**न शब्दब्रह्मोत्थं परिमलमनाघ्राय च जनः ।**
**कवीनां गम्भीरे वचसि गुणदोषौ रचयतु ।।**[22]

इति कवेः वचनेन अस्य रचना व्याकरणशुद्धा, प्रयोगवैचित्र्यबन्धुरेति सर्वैरङ्गीकृतमेव। विलक्षण शब्दप्रयोगेण स्वरूपतः अर्थतः पदगाम्भीर्येण श्रोतॄणां विलम्बेनार्थबोधकान् शब्दान् बहुत्र वाक्येषु प्रायुङ्क्त। नैषधं विद्वदौषधम् इत्युक्तिवत्, **मुरारिपदचिन्ता चेत्तदा माघे मतिं कुरु** इत्यार्योक्तिः विद्वल्लोके अनर्घराघव -विषये विद्यमानप्रयोगवैचित्र्यपुरस्कृतवैशिष्ट्यं विशदीकरोति ।

**ये शब्दशास्त्रनिष्णाताः ये शीलितनिघण्टवः ।**
**तेषामेवाधिकारोऽस्ति मुरारिकृतनाटके ।।**

इत्युक्त्या कवेरस्य व्याकरणशास्त्रनिष्णातत्वं नाटकस्यास्य प्रौढिमा चावगम्यते।

नाटकेऽस्मिन् कवेरस्य व्याकरणशास्त्राभिनिवेशद्योतकाः बहवः शब्दप्रयोगाः दृश्यन्ते । यथा प्रथमाङ्के - **कच्चित् कान्तारभाजां...**[23] इत्यस्मिन् श्लोके **कर्तुं वा कच्चिदन्तर्वसति वसुमती दक्षिणः सप्ततन्तुः** इति वाक्ये कर्तुमिति तुमुन्नन्तशब्दप्रतिपाद्यक्रियायां कर्मकारकत्वेन सप्ततन्तुशब्दवाच्यः यागः अन्वेति, अतः सप्ततन्तुशब्दात् कर्मणि-द्वितीया इति सूत्रेण द्वितीयाविभक्तिः प्राप्नोति, किन्तु अभिहिते कर्मादौ प्रथमैव इति नियममनुसृत्य प्रथमाविभक्तिरेव प्रयुक्ता। अत्र सप्ततन्तुशब्दार्थस्य' कर्तुं, वसति' इत्येवं द्वयोः क्रिययोरपि अन्वयसम्भवेऽपि प्रधानक्रियान्वयस्याभ्यर्हितत्वात् तमनुसृत्य वसतीति प्रधानक्रियया कर्मणः अभिहितत्वात् सप्ततन्तुशब्दात् प्रथमाविभक्तिरेव प्रयुक्ता । तदुक्तं **यदेवोक्तं विशेष्येण तिङा वा यदि वा कृता, विशेषणक्रियासक्तमप्युक्तं तद्भवेदिति** इति शास्त्रकाराः। एवमेव समूलघातमभिघ्नति, जीवग्राहं गृह्णाति इत्यादिप्रयोगेषु, अक्ष्णा काणीचकार, भैरवस्य स्मरण इत्यादि कारकप्रयोगेषु,

चुचूषति, पिपर्तु, उल्ललयति, जम्बालपिण्डायते, प्रायश्चित्तयां चक्रे, अद्यापिपत् इत्यादि तिङन्तप्रयोगेषु कर्णे जपाः, भोगीणः, लेलिहानः इत्यादिकृदन्तप्रयोगेषु विशिष्टवाक्यप्रयोगेषु च मुरारेः शब्दशास्त्र-निष्णाततत्वं स्फुटी भवति। यथा वाक्येषु-

१.मम हि, गुरुवचनतृष्णामङ्कुशीकरोति श्रोत्रवृत्तिः इन्द्रियान्तरानु-सारिणो हृदयमहागजस्य ।[24]

२.अद्य खलु दिलीपकुल कुशलकर्मकल्पलतानामङ्कुरग्रन्धिभिरु-दीर्यन्ते किसलयानि।[25]

३.यदियं त्वदुपस्थानसुलभसम्भावनातिप्रसङ्गसङ्गीतनर्तकी मे चित्तवृत्तिः नियोगानुग्रहाय स्पृहयति।[26]

४.कस्य तलिनी तादृशी जिह्वा-यस्त्वामपि ब्रुवाणमथरोत्तरेण अभिसन्धत्ते।[27]

५.कथमुदयगिरिकाश्मीरकुङ्कम केदारस्य प्रभातसन्ध्यालतायाः प्रथमस्तबकः गभस्तिमाली हस्ताहस्तिकया कुतूहलिनीभिः दिगङ्ग-नाभिः वारुणीं यावदुपनीतः ।"[28]

६.न हि मिहिरमरीचि निचयपचेलिमस्य तुहिनकरबिम्बसंवादात् अपरोऽपि कश्चिदगदङ्कारः कैरवाकरस्य।[29]

इत्यादिवाक्येषु बहुषु स्वीयनानाशास्त्रपाण्डित्यप्रतिभां प्राकटयत्। एवमेव साक्षात् व्याकरण-शास्त्रसम्प्रदायस्फोरकानि वाक्यानि बहूनि नाटकेऽस्मिन् दरीदृश्यन्ते। यथा षष्ठाङ्के –

शुकः-**दाशरथिविजयाय सन्नहते देवः** [30] इत्याह। अत्र दाशरथिविजयाय इति समस्तपदे दाशरथेः विजयः इति विग्रहे षष्ठीविभक्तिः कर्त्रर्थे वा, कर्मार्थे वा इति सन्देहो जायते। अतः रामकर्तृकविजयः, रामकर्मकविजयः (रामस्य पराजयः) इत्यपि पर्यवस्यति। एतत् निशम्य माल्यवान् भणति - **कथं दाशरथिविजयायेति अवशिष्टोपपत्तिककर्तृकर्मकारकाविषयं वयस्य वचनम्** [31] इति शङ्कां प्राकटयत् ।

एवमेव माल्यवान् स्वीयवचने- **स्वस्ति, विजयेतां रामलक्ष्मणौ कुम्भकर्णमेघनाथौ**[32] इत्युक्तौ अत्र विजयः रामलक्ष्मणकर्तृको वा, कुम्भकर्णमेघनाथकर्तृको वा इति सन्दिहानः शुकः शान्तं पापम्, कथमविशिष्टकर्मकर्तृभावमुभयत्र द्विवचनं प्रयुक्तमार्येण इत्यवदत् ।

व्याकरणशास्त्रमात्रप्रसिद्धान् आदेशः, स्थानिवद्भावः, आकृतिगणः, साधकतमम्, जनिकर्तुः प्रकृतिः, प्रकृष्टकर्त्रभिप्रायक्रियाफलवतः इत्यादीन् शब्दान् काव्ये ऽस्मिन् सन्दर्भानुसारं नाटकार्थपरतया प्रायुङ्क्त।

मुरारिः शब्दप्रयोगे ईषदिव चमत्कृतिं (वक्रतां), वैशिष्ट्यं च प्रादर्शयत्। साक्षादर्थबोधकप्रसिद्ध-शब्दान् विहाय तत्तदर्थेषु विलक्षणशब्दान् प्रयुयोज। यथा गरुडध्वजः इति वक्तव्ये **शकुन्तराजकेतुः**[33] इति, आत्मज्ञानसुखावस्थितिः इत्यर्थे **प्रत्यङ्ज्योतिः प्रबोधसुखासिका**[34] इति, शिवधनुर्भञ्जनप्रीतिचरः इत्यर्थे **कात्यायनी-कामुककार्मुकारोपणप्रणयप्रवीणः**[35] इत्यवेचत्। एवमेव **अषडक्षीण-षाड्गुण्यमन्त्री**[36],**चतुर्मुखीकण्ठशृङ्गाटकविहारिणीम्**[37], **कण्ठोपकण्ठ-पलितङ्करणी**[38], **तारामैत्रकम्**[39], **अहिभयोपजापजर्जरम्**[40], **निक्षार-तराम् , डुलि चक्षुषि** [41]**, एकलोष्टवधः**[42] इत्यादीन् शब्दान्, जयापजयाभ्याम् इति वक्तव्ये **अन्वयव्यतिरेकाभ्याम्**[43] इति, **प्रहासविभीषिकाम्** [44] इति, असिना आत्महत्यां कुर्यामित्यभिप्राया-विष्करणाय **जरसा दूषितस्य आत्मनः प्रक्षालनाय प्राप्तं शस्त्रधारातीर्थम्**[45] इति प्रायुङ्क्त। मृतोऽसि इत्यर्थे **पर्यवसितोऽसि** इत्येवं प्रकारेण सर्वत्र स्वीयं विशिष्टं पन्थानं प्रादर्शयत्।

एवं **तद्धितप्रयोगेषु** कविरयं नितान्तमभिनिविष्टः। यथा- रैणुकेयः, त्रैशङ्कवम्, शातमन्यवम्, भवनम्, राहवीयम्, वैष्णवीयम्, पौष्पकेतवम्, ऐन्दुमतेयः, वैबुधसैन्धवी इत्यादि प्रयोगाः बहवः दृश्यन्ते।

अपि च **निघण्टुषु** उपलभ्यमानाः अतिविरलाः प्रयोगाः काव्येऽस्मिन् बहुत्र दृश्यन्ते - आशुशुक्षणिः (अग्निः), कमिता (कामुकः), प्रणाय्यः (मुमुक्षुः), आश्वीनम् (एकस्मिन् दिने अश्वेन गम्यमानदेशः), तर्कः (कुन्दः), पौरोगवः (पाकशालाधिपतिः), - प्रधिः, शृङ्गाटकम् (चतुष्पथम्), उल्लाघनः (वैद्यः), जाङ्गलिकः (विषवैद्यः), द्वैराज्यम् (प्रतिपक्षता), क्रतुलिहः (देवाः), स्वाजन्यम् (समानकुले जननम्), खर्जूलता (कण्डूतिः), नयः (अभिनयः), चरमः (ज्येष्टः) इत्यादि प्रयोगाः अनेके दरीदृश्यन्ते ।

-इत्थं महानुभावस्य मुरारेः निखिलशास्त्रैकवैदुष्यम् अनर्घराघव-काव्यात् प्रतीयते। विशिष्य व्याकरणे निघण्टुषु च असमानं पाण्डित्यं काव्यादस्मात् साक्षीक्रियते ।

**Foot Notes-**

[1]अ.रा.२.१७

[2]तत्रैव.1.50

[3]तत्रैव.७.६२

[4]तत्रैव. २.३४

[5]तत्रैव. २.३५

[6]तत्रैव. २.५०

[7]तत्रैव. ३.९

[8].तत्रैव.३.१३

[9]अ.रा.३.३५

[10] तत्रैव. ३.११

[11] तत्रैव. ५.५

[12] तत्रैव. ५.२२

[13] तत्रैव. ३.३४

[14] अ.रा.३.३४

[15] तत्रैव. ५.२२a

[16] तत्रैव.७.६२

[17] तत्रैव. ७.१०२

[18] तत्रैव. २.७a

[19] तत्रैव.४.१४

[20] तत्रैव. ६.९a

[21] अ.रा.६.९

[22] तत्रैव. ७.१५१

[23] तत्रैव.१.२५

[24] अ.रा.१.१६a

[25] तत्रैव. १.२४a

[26] तत्रैव.१.३३a

[27] तत्रैव. १.४०a

[28] तत्रैव. २.४३a

[29] ३.५७a

[30] अ.रा.६.२२a

[31] तत्रैव. ६.२२a

[32] तत्रैव.६.१८a

[33] तत्रैव 3.19A

[34] तत्रैव 3.23

[35] तत्रैव. ३.१६

[36] तत्रैव. ३.६

[37] तत्रैव.१.११

[38] तत्रैव.१.१५

[39] तत्रैव. १.१५a

[40] तत्रैव. २.७a

[41] तत्रैव. ३.५१a

[42] तत्रैव 4.14A

[43] तत्रैव 6.19

[44] तत्रैव 7.148

[45] तत्रैव 6.22a

**उपयुक्तग्रन्थसूची-**


1. अनर्घराघवम्- चौखम्बासुरभारती प्रकाशन्- नवदेहली
2. अनर्घराघवम् - बेतवोलु रामब्रह्मम्- तेलुगु अकाडमी- हैदराबाद्
3. अनर्घराघवम्- इष्टार्थकल्पवल्ली पञ्चिका व्याख्योपेतम्
4. वैयाकरणसिद्धान्तकौमुदी- चौखम्बासुरभारती प्रकाशन- नवदेहली
5. आपस्तम्बस्रौतसूत्रम्- चौखम्बसुरभारतीप्रकाशन, नवदेहली
6. काव्यप्रकाशः - नागेश्वरी टीका- चौखम्बा संस्कृत संस्थान, वाराणशी
7. नाट्यशास्त्रम्- अभिनवभारती व्याख्या- परिमल पब्लिकेशन, दिल्ली
8. अलङ्कारशास्त्रचरित्र- आचार्य पुल्लेल श्रीरामचन्द्रुडु- सस्कृत-भाषाप्रचार समिति, हैदराबाद्
9. अमरकोशः - रामाश्रमी टीका- चौखम्बासुरभारती प्रकाशन-नवदेहली
10. शब्दकल्पद्रुमः - श्रुजन झा App